# पर्यावरणीयसन्दर्भे सोमयागस्य वैज्ञानिकता

**बालकृष्ण मिश्र**
शोधार्थी, संस्कृत विभाग
अपेक्स यूनिवर्सिटी, जयपुर

अग्नीषोमात्मके जगति सोमाग्न्योरवास्यापरिवर्तनमेव मूलतो जागतिकानां पदार्थानाम वस्थापरिवर्तनं सम्भवतीति वेदविज्ञानवादिनामाचार्याणामभिमतमस्ति महर्षि ऐतरेयः उल्लिखति यत् मनस् एव अवस्थापरिवर्तनस्य मूलहेतुरस्ति। यतो हि मनो यथा कल्यते तथैव परिवर्तनस्य दिक् निश्चीयते। मन:कामनानुगतमेव प्राणानामन्तर्व्यापार: सम्भवति। तत्पश्चात् वाचो बहिर्व्यापार: श्रमदिरूपः सम्भवति। यथोक्तम् शतपथब्राह्मणे-

**"प्रजापतिस्कामयत, सोऽश्राम्यत्, स तपोऽतप्यत1।"**

अर्थात् सर्वप्रथमं जगत्स्रष्टा प्रजापतिरेव मनसि कामनामकरोत् पश्चात् श्रमं संजभार स श्रमस्तपोरूप असीत् । तत्तपसा दृश्यमान जगत् उदपद्यत। अनेन स्पष्टीभवति प्राणं परिवर्तयितुं मनस् एव सशक्तं योजकमस्ति । प्राणेनैव स्वरुपान्यतरत्वमुत्पद्यते। सजीवनिर्जीवपदार्थेषु विद्यमानोऽत्रिप्राण: मनः कल्पनानुगतमेव महानात्मानं प्रेरयति तास्मात्पदार्थः पूर्वावस्थां जहाति नूतमावस्थां च प्राप्नोति। अतएवोक्तम्

**"प्राण एवं रज्जु:, प्राणेन हि मनश्च वाक् चामिहिते2।"**

एवं चेत् प्रकृतावपि पर्यावरणमूलो यो यज्ञः सम्पद्यते स प्राकृतिकोपादानानामेव श्रमरूप:। तत्तपस एव फलं यद्विशुद्धं जलं विशुद्धो वामुश्च लभ्येते । अनेनवियज्ञस्य संकल्पमूलकता सुसिद्धा भवति । अपि चोक्तं 'यज्ञा: संकल्पसम्भवा'३ इति । यज्ञे संकल्पपूर्वक मन्त्रोच्चारणं विधीयते। तत्र संकल्पो मनसः क्रियाविशेष एवभवति। मन्त्रोच्चारणं च श्रमो भवति। मनश्शक्ते मूर्तरूपमेव मन्त्र: अतएवोक्तं 'मनवात् मन्त्र उच्चते४' इति। मन्त्रोच्चारणेनापूर्वोत्पत्ते: प्रक्रिया आरभते। तस्मान्मन एव प्रजापतिरप्युक्तः प्रजापतिश्च प्राणस्थाप्यपरं नाम। अपूर्वोत्पत्ति सम्पादनादेव तस्य देवत्वमुपपद्यते। उक्तंच- 'तस्मात् प्राणा देवा:५'। 'प्राणावैदेवा:'६ इति च।

तात्पर्यमिदमस्ति यत्प्रकृतौ मतश्शाक्त्या सक्रियत्वमाप्ता एव प्राणा: पदार्थान उत्पादयन्ति आविर्भावियन्ति च।

मनश्शक्तिप्रभावेण प्राणा ऊर्जान्विता भवन्ति। त एव प्राणा चैतन्यमाप्तुं प्रभवन्ति। परिणामतः सजीवोत्पत्तिर्जायते। सजीवा एव पर्यावरणमपेक्षन्ते यतो हि विशुद्धे पर्यावरणे एव तेषां जीवनाप्रक्रिया सम्पद्यते। एवं च सजीवसापेक्षतया पर्यावरणस्य महत्त्वं लोके प्रतिष्ठितम्।

अन्नस्य वनस्पतेर्वाऽपि पर्यावरणे सजीवसापेक्षतयैव महत्वमस्ति। यतो हि अन्नं विना चापि सजीवा न जीवितुं क्षमन्ते। अनेन दृष्टिकोणेन इदं वक्तुं शक्यते यत् मनः प्राणमाध्यमेन, पदार्थं सक्रियं विदधाति पदार्थस्चान्न रूपेण जैविकप्रक्रियया मन: बलीयः करोति1। एवं प्राणान्नयो सम्वन्धः शाश्वतिको विद्यते। मनसः अन्नेन सम्बन्धोऽपि तदाधारितश्च लक्ष्यते। पर्यावरणेऽन्नस्य वनस्पतेश्चापि विशुद्धत्वं तस्यादपेक्षते। यतो हि दूषितान्नेन दूषितवनस्पतिभिश्च प्राणिन: स्वास्थ्यहानिं लभन्ते। स्वास्थ्यं च जीवनस्य सशक्त आधार:। स्वास्थ्यरक्शाये विशुद्धस्य अन्नस्य आवश्यकता भवति2। विशुद्धेनान्नेन विशुद्धं मनो भवति, तेन विशुद्धं चिन्तनमुत्पद्यते। एवं चेत् सजीवानां प्रवृत्तिमार्ग: उचितदिशायां दृग्गोचरीभवति। अध्यात्म यज्ञोऽयंवक्तुं शक्यते यतो हि प्राणिनामात्मा विशुद्धं मनः अपेक्षते। अन्नेन मनसो निर्माणस्य प्रक्रिया अतिमहती अस्ति। तथा हि अन्नं रस:, रसो रक्तं, रक्तं मेद:, भेदोऽस्ति, अस्थि मज्जां, मज्जा शुक्रं, शुक्र: ओज:, ओजो मन: उत्पादयति। मन: एव कालान्तरे प्राणत्वमाप्नोति। प्राणश्च यदा भौतिकशरीरं परिणमति तदा सजीवस्यास्तित्वमुपपद्यते। अयमेवाधिभूतयज्ञ उक्त:3।

'अग्निर्वायुरादित्यं त्रयं ब्रह्मसनातनम्।

दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुस्सामलक्षणम्4॥”

**इत्युत्लेखन प्रकृतौ अग्नि वायु आदित्यश्च समेषां प्राणिनां निर्जीवपदार्थानां च एत एव त्रयो मूलाधाराः सन्ति। एते एवं पदार्थमात्रे ऊर्जाया उत्पादका भवन्ति। एषां च पुनस्त्राणामाधार: सोम:। सोम एव ऊर्जाया संघटनमात्मन्यादधाति। तस्मादेवायममृत मित्युच्यते। अयं च रस रूपो विरलतया न मूलरूपे दृष्टोभवति। रूपान्तरं परिणतोऽयं जलरूपेण पृथिव्यामुपलभ्यते। जलमपि अन्यतमं पर्यावरणीयं घटकम्। न हि जलं विना जीवनं सन्भवं यतो हि अशनायापिपासे जलेनैवोपशमिते भवतः। सोमस्य विरलतम रूपे वायुरस्ति। वायुं विमापि जीवनं सम्भवं नास्ति, यतो हि प्राणिनां श्वसनक्रिया अनेनैवोपपद्यते। तस्माच्छुतौ उभयोर्देवत्वमुक्तम्। तत्र जलस्य देवत्वं यथा-**

**'शं नो देवीरभीष्टये, आपो भवन्तु पीतये शंयोरभि स्त्रवन्तु5।" इति।**

वायोर्देवत्वं भेषजरूपम्। यथोक्तम् 'वात आ वातु भेषजम्' इति। सोमस्य नियमनायाग्निरपरो देवताऽभिमतः।

सोमोऽप्यग्नेर्नियामक उक्तः। एवमुभयोः सोमाग्न्योर्मिथो नियामकत्वं भवति तेनैवे प्रकृतिः सुस्थिरा भवति।

एते एव अग्निः वायुः आदित्यश्च प्रकृतेः संरक्षकाः। एष्वाग्निर्मोक्तृत्वं ददाति, वायुश्च प्राणवत्त्वं ददाति, आदित्यः पदार्थोत्पत्ति हेतुत्वमादत्ते। पदार्थेषु प्रत्येकममीषां त्रयाणां विद्यमानता परिलक्ष्यते। प्रकृतौ धातुषु निर्जीवपदर्थिषु केवलं मूर्तत्वं लक्षितं भवति, वनस्पतौ मूर्त्तत्वं क्रियावत्त्वं च लक्षिते भवतः, सजीवेषु प्राणिषु मूर्त्तत्वं क्रियावत्वं ज्ञानतत्त्वं च लक्षितानि भवन्ति। एवं यथा सर्वा बाह्यप्रकृति त्रिभिरभिरूपकृता, तथैव सर्वे प्राणिनोऽप्युपकृता एव। उभयोरनुकूलनमेव पर्यावरणस्यौचित्यं दर्शयति। अस्मादेव कारणात् प्राक्तनं यज्ञविज्ञानम् आधुनिकविज्ञानस्यापि संपूरकं कैश्चित् स्वीकृतम्-

"In classical Mechanics the properties and behavior of the parts determine those of the whole; the situation is reversed in quantum mechanics: it is the whole that determines the behavior of the parts.1"

वेदविज्ञान समर्थकानामाधुनिकसमीक्षकानां मान्यताऽस्तियत् अग्नौ सोमस्य आहुतिरेव सोमयाणस्य मूलभूतस्वरूपमस्ति। आण्विकस्तरे आग्निर्धनात्मकोर्जाया: सोमश्च ऋणात्मकोर्जाया: कार्यं करोति। जैविकस्तरे अग्निरेव पुंस्त्वं सोमश्च स्त्रीत्वमाददतः। पर्यावरणीयस्तरे अग्निरेवोष्ण त्वं सोमश्च शीतत्व माददत:। अस्य सोमयागस्य निष्कर्षोऽयमस्ति यत् अग्नीषोमयोईयो: मिथोविरोधितत्त्वयो: संगतिकरणेन तृतीयस्याभिनवस्य अपूर्वस्योत्पत्तिर्भवति। प्राकृतयज्ञोऽपि अत्र प्रमाणमस्ति। प्रकृतौ कश्चिदपि नूतनः पदार्थ: तदेवोत्पद्यते यदा इयो: पदार्थयोरन्तर्यामसम्बन्ध: स्थापितो भवति। आधुनिक विज्ञानवादिन अमुं सम्बन्धं 'रासायनिक प्रक्रिया' शब्देन प्रवदन्ति। एवं वेद विज्ञानं तत्पूर्वरूपमेव न ततो भिन्नमिति प्रतीयते। वेद विज्ञानं भोक्तृभोग्यसंज्ञया पदार्थानां कोटिइयं प्रतिपादयति, आधुनिकं विज्ञानं पुन: जीववनस्पति संज्ञया सजीवानां कोटिद्वयं निर्धारयति। याज्ञिका: अन्नमं अन्नादश्चेति वदन्ति। अन्नादोऽग्निरेवान्नं सोमं भुंक्ते। जीवेषु वनस्पतिषु च सर्वत्रानयोःतस्वद्वयोः प्रवर्त्तमानत्वात् सोमयज्ञस्य प्रकृत्या सम्पादनमनुमातुं शक्यते।

पर्यावरणीय सन्दर्भे यज्ञचक्रमपरिहार्यमस्ति। अस्मिन् प्राकृतयज्ञचक्रे हुतस्य सोमस्य स्वरूपद्वयमुपपद्यते - प्रथमं स्वरूपं पदार्थाङ्ङ्ग.त्वमाप्नोति, द्वितीयं स्वरूपमुच्छिष्टं पदार्थान्तरं परिपुष्णाति। तत्र प्रथमं स्वरूपं ब्रह्मोदनमुच्यते द्वितीयं स्वरूपं प्रवर्ण्य मुच्यते। इदं प्रवर्ग्य मेवोच्छिष्टं भवति। तेन पदार्थान्तराणि पुष्णन्ति। अतएवोक्तम्-

**"उच्छिष्टाज्जज्ञिरे सर्वे दिविदेवा: दिवि श्रिता: ।।" इति।**